Amritanilayam Stotras

???????????? 79

बलसमेतबलानुगतो भवान् पुरमगाहत भीष्मकमानितः ।
द्विजसुतं त्वदुपागमवादिनं धृतरसा तरसा प्रणनाम
सा ॥ 1॥

भुवनकांतमवेक्ष्य भवद्वपुर्नृपसुतस्य निशम्य च
चेष्टितम् ।
विपुलखेदजुषां पुरवासिनां
सरुदितैरुदितैरगमन्निशा ॥ 2॥

तदनु वंदितुमिंदुमुखी शिवां
विहितमंगलभूषणभासुरा ।
निरगमत् भवदर्पितजीविता स्वपुरतः पुरतः
सुभटावृता ॥ 3॥

कुलवधूभिरुपेत्य कुमारिका गिरिसुतां परिपूज्य च
सादरम् ।
मुहुरयाचत तत्पदपंकजे निपतिता पतितां तव केवलम् ॥
4॥

समवलोककुतूहलसंकुले नृपकुले निभृतं त्वयि च
स्थिते ।
नृपसुता निरगाद्गिरिजालयात् सुरुचिरं
रुचिरंजितदिङ्मुखा ॥ 5॥

भुवनमोहनरूपरुचा तदा विवशिताखिलराजकदंबया ।
त्वमपि देव कटाक्षविमोक्षणैः प्रमदया
मदयांचकृषे मनाक् ॥ 6॥

क्वनु गमिष्यसि चंद्रमुखीति तां सरसमेत्य करेण
हरन् क्षणात् ।
समधिरोप्य रथं त्वमपाहृथा भुवि ततो विततो निनदो
द्विषाम् ॥ 7॥

क्व नु गतः पशुपाल इति क्रुधा कृतरणा यदुभिश्च
जिता नृपाः ।
न तु भवानुदचाल्यत तैरहो पिशुनकैः शुनकैरिव केसरी
॥ 8॥

तदनु रुक्मिणमागतमाहवे वधमुपेक्ष्य निबध्य
विरूपयन् ।
हृतमदं परिमुच्य बलोक्तिभिः पुरमया रमया सह कांतया ॥ 9॥

नवसमागमलज्जितमानसां
प्रणयकौतुकजृंभितमन्मथाम् ।
अरमयः खलु नाथ यथासुखं रहसि तां
हसितांशुलसन्मुखीम् ॥ 10॥

विविधनर्मभिरेवमहर्निशं प्रमदमाकलयन् पुनरेकदा ।
ऋजुमतेः किल वक्रगिरा भवान्
वरतनोरतनोदतिलोलताम् ॥ 11॥

तदधिकैरथ लालनकौशलैः प्रणयिनीमधिकं
सुखयन्निमाम् ।
अयि मुकुंद भवच्चरितानि नः प्रगदतां
गदतांतिमपाकुरु ॥ 12॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh. Phone Number: +91 9493475515 | www.amritanilayam.org